# ईशावास्योपनिषद्भाष्यम्

ॐ पूर्णमदः पूर्णमिदम् पूर्णात् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमदाय पूर्णमेवावशिश्यते

ॐ शांतिः शांतिः शांतिः

ॐ ईशावास्यमिदम् सर्वं यत्किञ्च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जिथा मा गृधः कस्यस्विद्धनम् ॥ १ ॥

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतम् समाः ।
ऐवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥२ ॥

असुर्या नाम ते लोका अन्धेन तमसाऽऽवृताः ।
ताम्स्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः॥ ३ ॥

अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन्पूर्वमर्षत् ।
तद्धावतोऽन्यानत्येति तिष्टत्तस्मिन्नपो मातरिश्वा दधाति ॥४ ॥

तदेजति तन्नैजति तद्दूरे तद्वन्तिके ।
तदन्तरस्य सर्वस्य तदु सर्वस्य बाह्यातः ॥५ ॥

यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति ।

सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ॥६ ॥

यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः ।
तत्र को मोहः कः शोक ऐकत्वमनुपश्यतः ॥७ ॥

स पर्यगाच्छुक्रमकायमव्रणामस्नाविरम् शुद्धमपापविद्धम् ।
कविर्मनीषी परिभूः स्वयम्भूर्याथतथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः ॥८ ॥

अन्धं तमः प्रविशन्ति येऽविद्यामुपासते ।
ततो भूय इव ते तमो य उ विद्यायां रताः ॥९ ॥

अन्यदेवाहुर्विद्ययाऽन्यदाहुरविद्यया ।
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥१० ॥

विद्यां चाविद्यां च यस्तद्वेदोभयं सह ।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ॥११ ॥

अन्धं तमः प्रविशन्ति येऽसम्भूतिमुपासते ।
ततो भूय इव ते तमो य उ सम्भूत्यां रताः ॥१२ ॥

अन्यदेवाहुः सम्भवादन्यदाहुरसम्भवात् ।
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥१३ ॥

सम्भूतिं च विनाशं च यस्तद्वेदोभयं सह ।

विनाशेन मृत्युं तीर्त्वा सम्भूत्याऽमृतमश्नुते ॥१४ ॥

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ।
तत् त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ॥१५ ॥

पूषन्नेकर्षे यम सूर्य प्राजापत्य व्यूह रश्मीन् ।
समूह तेजः यत् ते रूपं कल्याणतमं तत् ते पश्यामि ॥१६ ॥

योऽसावसौ पुरुषः सोऽहमस्मि॥१७॥

वायुरनिलममृतमथेदं भस्मान्तं शरीरम्॥१८॥

ॐ क्रतो स्मर कृतं स्मर ।
ॐ क्रतो स्मर कृतं स्मर ॥१९ ॥

अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम ॥२० ॥

ॐ पूर्णमदः पूर्णमिदम् पूर्णात् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमदाय पूर्णमेवावशिश्यते

ॐ शांतिः शांतिः शांतिः